# Shrikantha Trishati NamAvali 300 Names

# श्रीकण्ठत्रिशतीनामावलिः

## Document Information

Text title : Shrikantha Trishati Namavali 300 Names

File name : shrIkaNThatrishatInAmAvaliH.itx

Category : shiva, shatInAmAvalI, nAmAvalI

Location : doc_shiva

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brahmandapurana

Latest update : July 17, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

# श्रीकण्ठत्रिशतीनामावलिः

ऋषयः ऊचुः -
सूत सूत महाभाग सर्वशास्त्रविशारद ।
रहस्यं श्रोतुमिच्छामो लोकानां मोक्षदायकम् ॥ १॥

श्रीसूत उवाच -
शृणुध्वं मुनयः सर्वे सावधानेन चेतसा ।
पुरा संप्रार्थिता गौरी कुमारेण महात्मना ॥ २॥

यद्रहस्यमुवाचैतत् पुत्रस्नेहेन संयुता ।
तदेवेदं महादेव्या नाम्नां त्रिशतमुत्तमम् ॥ ३॥

गुरोः प्रसादाद् व्यासस्य पुरा भक्त्या मया श्रुतम् ।
यथाश्रुतं प्रवक्ष्यामि सर्वलोकहिताय तत् ॥ ४॥

ध्यानम् -
चन्द्रोपरिष्टात्सम्बद्ध पद्मासनविराजितम् ।
चन्द्रवर्णं स्रवद्दिव्यामृतचन्द्रकलाधरम् ॥ ५॥

योगमुद्राक्षसम्बद्धाधरहस्तद्वयान्वितम् ।
अमृतापूर्णकनककलशाप्तकरद्वयम् ॥ ६॥

सोमसूर्याग्निनेत्रं च बद्धपिङ्गजटाधरम् ।
नागाभरणसम्भूषं नागयज्ञोपवीतिनम् ॥ ७॥

व्याघ्रचर्माम्बरधरं देवं भक्तानुकम्पिनम् ।
भस्मानुलेपितं रुद्रं मृत्युञ्जयमिमं नुमः ॥ ८॥

अथ नामावलिः ।
श्री श्री श्रीकण्ठाय नमः । महादेवाय । वृषकेतवे । महेश्वराय ।
मृत्युञ्जयाय । चन्द्रचूडाय । पार्वतीशाय । कपालभृते ।
अष्टमूर्तये । अनेकात्मने । त्रिणेत्राय । प्रमथाधिपाय । शिवाय ।

रुद्राय । विषधराय । मृडाय । शम्भवे । जटाधराय ।
भस्मोद्धूलितसर्वाङ्गाय । नागाभरण भूषिताय नमः । २०

व्याघ्रचर्माम्बरधराय नमः । व्यालयज्ञोपवीतवते ।
रुद्राक्षमालाभरणाय । त्रिपुण्डाङ्कितमस्तकाय ।
शुद्धस्फटिकसङ्काशाय । केतकीशापदायकाय । गङ्गाधराय ।
वृषारूढाय । शूलपाणये । शिवाप्रियाय । पञ्चवक्त्राय ।
दशभुजाय । सच्चिदानन्दविग्रहाय । मदनारये । कालकालाय ।
दक्षाध्वरहराय । अव्ययाय । सद्योजाताय । वामदेवाय ।
गिरिशाय नमः । ४०

नीललोहिताय नमः । अघोरमूर्तये । ईशानाय । उग्राय । तत्पुरुषाय ।
हराय । दिगम्बराय । रामपूज्याय । व्योमकेशाय । नटेश्वराय ।
जलन्धरारये । अव्यक्ताय । त्रिपुरारये । गणेश्वराय । पिनाकिने ।
मेरुकोदण्डाय । कपर्दिने । गजचर्मवते । कुमारजनकाय ।
भर्गाय नमः । ६०

भूरथाय नमः । भक्तवत्सलाय । कल्याणसुन्दराय । शर्वाय । भवाय ।
भीमाय । भयापहाय । विष्णुचक्रप्रदात्रे । दारुकारण्य संश्रिताय ।
अन्धकारये । विरूपाक्षाय । कङ्कालाय । विष्णुवल्लभाय । ऊर्ध्वरेतसे ।
गजारातये । वेदाश्वाय । ब्रह्मसारथये । शूराय । पशुपतये ।
स्थाणवे नमः । ८०

सूर्यचन्द्राग्निलोचनाय नमः । कैलासवासिने । भीमेशाय ।
दक्षिणामूर्तये । ईश्वराय । विघ्नेशवरदाय । श्रीमते । शाश्वताय ।
तारकेश्वराय । गणेशताताय । शान्तात्मने । निर्मलाय । निरुपद्रवाय ।
निरामयाय । निरालम्बाय । निर्ममाय । नित्यवैभवाय । निर्गुणाय ।
निष्कलाय । नित्याय नमः । १००

निर्वैराय नमः । नीतिपारगाय । निरञ्जनाय । नित्यशुद्धाय ।
निस्सङ्गाय । निर्मलात्मकाय । विश्वेश्वराय । वीरभद्राय । भैरवाय ।
भाग्यदायकाय । भूतेश्वराय । महाकालाय । चण्डिकेशवरप्रदाय ।
अनन्तगुणगम्भीराय । मार्कण्डेयवरप्रदाय । संहारकृते । महायोगिने ।
वज्रदेहाय । दुर्जयाय । निराकाराय नमः । १२०

नित्यतुष्टाय नमः । निष्कामाय । नागकुण्डलाय । निष्पापाय ।

नागवलयाय । कार्यत्रयविधायकाय । ऊर्ध्वकेशाय । चारुहासाय ।
विष्णुब्रह्मेन्द्रवन्दिताय । नागेन्द्रहाराय । फालाक्षाय । वरदाय ।
विश्वरूपधृते । विश्वरक्षाय । परब्रह्मणे । शिपिविष्टाय ।
चिरन्तनाय । पूज्याय । ब्रह्मशिरश्छेत्रे । मन्दराद्रिस्थिताय नमः । १४०

प्रभवे नमः । निगमागमसंवेद्याय । त्रिगुणात्मने । त्रयीतनवे ।
अर्धनारये । हरिहराय । महालिङ्गोद्भवाय । महते । वासुकीज्याय ।
शिवतराय । शरभाय । अनन्तरूपधृते । कृत्तिवाससे । बाणपूज्याय ।
मृगधारिणे । सनातनाय । अनाहताब्जपीठस्थाय । श्रेष्ठाय ।
कलिविनाशनाय । नववीरपित्रे नमः । १६०

शुद्धाय नमः । भगवते । बन्धमोचकाय । सतीकान्ताय । जगत्पूज्याय ।
हरिकेशाय । शुभप्रदाय । कालाग्निरुद्राय । विश्वात्मने । नन्दीशाय ।
भगनेत्रहृते । त्र्यम्बकाय । खण्डपरशवे । शङ्कराय ।
भूतवाहनाय । सामप्रियाय । स्वरमयाय । कठोराय । पापनाशनाय ।
हिरण्यरेतसे नमः । १८०

दुर्धर्षाय नमः । जगद्व्यापिने । सदाशिवाय । नीलकण्ठाय ।
विषहराय । सहस्राक्षाय । सहस्रपदे । सहस्रशीर्षाय । पुरुषाय ।
तारकाय । परमेश्वराय । ओङ्काररूपाय । सर्वज्ञाय । धूर्जटये ।
पूषदन्तभिदे । चैतन्यरूपाय । धर्मात्मने । जगदाधारमूर्तिमते ।
कुबेरमित्राय । चिद्रूपाय नमः । २००

चिन्मयाय नमः । जगदीश्वराय । सत्यव्रताय । सत्यशीलाय ।
सत्यात्मने । विश्वतोमुखाय । पृथ्वीरूपाय । तोयरूपाय । तेजोरूपाय ।
अनिलात्मकाय । नभोरूपाय । सूर्यरूपाय । चन्द्ररूपाय । महाबलाय ।
ब्रह्मण्याय । यजमानात्मने । रुण्डमालाविभूषिताय । अणोरणुतराय ।
सूक्ष्माय । स्थूलाय नमः । २२०

स्थूलतराय नमः । शुचये । किरातरूपाय । भिक्षाटाय ।
कुण्डोदरवरप्रदाय । हालास्यनाथाय । गिरीशाय । महात्मने ।
माधवप्रियाय । यज्ञप्रियाय । यज्ञरूपाय । परस्मैज्योतिषे ।
परात्पराय । भवरोगहराय । धीराय । तेजस्विने । मोहिनीप्रियाय ।
कृशानुरेतसे । धर्मज्ञाय । मुनिवन्द्याय नमः । २४०

स्तुतिप्रियाय नमः । कामेश्वराय । विराड्रूपाय । कामरूपाय ।

कलानिधये । सभापतये । नादरूपाय । दहराकाशगाय । परस्मै ।
भृङ्गिनाट्यप्रियाय । देवाय । भस्मासुरवरप्रदाय । अहिर्बुध्न्याय ।
भटाक्षीराय । सोमास्कन्दाय । जयिने । विभवे । चण्डकोपिने ।
जगद्रक्षाय । निषङ्गिणे नमः ॥ २६०

क्षेत्रपालकाय नमः । खट्वाङ्गिने । शास्तृजनकाय । साम्बमूर्तये ।
दृगायुधाय । चराचरात्मकाय । कालनियन्त्रे । अजाय । वृषाकपये ।
अनादिनिधनाय । दान्ताय । विधात्रे । लिङ्गरूपभृते । द्योटिकाय ।
प्रणवान्तःस्थाय । पार्थपाशुपतास्त्रदाय । अपस्मारशिरोनृत्यते ।
विष्णुनेत्राब्जपूजिताय । कवचिने । पुष्पवच्चक्षुषे नमः । २८०

विष्णुबाणाय नमः । अजैकपदे । रेरिहाणाय । टङ्कधराय ।
पञ्चविंशतिरूपवते । शतरुद्रस्वरूपाढ्याय । श्मशानस्थाय ।
अस्थिभूषणाय । नादबिन्दुकलातीताय । नामतारकमन्त्रदाय ।
एकादशात्मने । लोकेशाय । भूतभव्यभवत्प्रभवे ।
पञ्चब्रह्मस्वरूपाय । घण्टाकर्णप्रपूजिताय । राजराजेन्द्रवरदाय ।
वेदात्मने । बिल्वकेश्वराय । कृष्णपुत्रप्रदात्रे ।
करुणारससागराय नमः । ३००

नमो नीलकण्ठाय नमः ।

इति ब्रह्माण्डपुराणान्तर्गता श्रीकण्ठत्रिशतीनामावलिः समाप्ता ।

Encoded and proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shrikantha Trishati NamAvali 300 Names*
pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*